Chapter-1

[library stamp]

# काव्यशास्त्रेषु नायक–नायिका भेद विमर्श:

## प्रथमोऽध्याय:

# पृष्टभूमि

पाठ्यं, गीतम्, अभिनयाः, रसाश्च नाट्यवेदस्याङ्गानि, यानि च ब्रह्मणोद्धृत्य वेदेभ्यः ऋक्सामयजुराथर्वणेभ्यः समानीतानि भवन्ति। गुरोर्ब्रह्मदेवस्य मुखाद् उपदेशरूपतया भरतेन तान्युपलब्धानि। सुन्दरतमान्येतानि पाठ्यादीनि वस्तूनि समाहृत्य भरतो नाट्यवेदं ग्रथितवान्।

अत्र कस्य वेदस्य नाट्यवेदं प्रति कीदृशमङ्गत्वमिति विचार्यते। ऋग्वेदात् पाठ्यम्, सामवेदात्, अभिनयान्, आथर्वणाद् रसं चैव नाट्यवेदनिर्मितौ भरतमुनिः समाहरत।[1]

**'जग्राह पाठ्यमृग्वेदात्'**

स्वरालङ्कारादिसामग्र्युपस्कृता सती विवक्षाविशिष्टस्वार्थार्पणक्षमा वाग् भवति पाठ्यम। उदात्तानुदात्तस्वरितत्रैस्वर्योपेतं पाठ्यम् ऋग्वेदे स्तोत्रशब्दद्वारेण यागकर्मण्युपयुज्यन्ते। तस्मन्नाट्यकर्मण्युपयोगाय पाठ्यम् ऋग्वेदाद् अभ्यस्तं भरतेन।

नाट्ये वाचिकाभिनयात्मकं पाठ्यमेव प्रथममुपादेयम्। वागेव प्रधानं नाट्यकर्मणि। एषां च नाट्यस्य तनुर्भवति सकलप्रयोग भित्तिभूतत्वेन आतोद्यगीताभिनयानुग्राहकत्वान् स्वयम् अभिनयरूपत्वच्च।[2] तस्यामेव निर्माणकाले कविः प्रयोगकाले नटश्च यत्नवान् भवेत्।

**"सामभ्यज्ञै गीतमेव च'।**

---

[1] ना. शा. (अ १) का – १७ -१८

[2] ना. शा. (अ XIV) का – २

वाचि यत्नस्तु कर्तव्या नाट्य स्यैषा तनुः स्मृता।
अङ्गनैपथ्यसत्वानी वाक्यार्थ व्यञ्जयन्ति हि॥

अभि-भा(भा II), पु २२० – २२१

पाठ्यगतस्वरप्रसङ्गात् तदनन्तरं गीतं सामवेदाद् अधीतं रसचर्वणायास्तदायत्तत्वात्। गानात्मको भवति सामवेदः। ततसुषिरात्मकमातोद्यं च साम्न एव सङ्गृहीतम् ।[1]

**'यजुर्वेदादभिनयान्'**

वाचिकाभिनयः पाठ्यरूपेण ऋग्वेदादेवाहृतः। वागङ्गनेपथ्यसत्त्वानि सहितान्येव रसं व्यञ्जयन्तीत्यतः आङ्गिकाहार्यसात्त्विकाभिनयाश्च समुपादेयाः। आध्वर्यवकर्मप्रधाने यजुर्वेदे आङ्गिकानेपथ्य सात्त्विकानां संभवाद् यजुषोऽभिनयः शिक्षितः। विशिष्टप्रयत्नपुरूष सम्पाद्यमनोऽवष्टम्भात्मां सात्त्विक एवात्राध्येयतया भवति। सत्त्वे नाट्यं प्रतिष्ठितम्। नाट्यं यदि वागङ्गजमात्रं स्यात्तर्हि प्रयत्नं विनैव तत्सिद्धिः स्यात्। अभिनयस्तु वागङ्गसत्त्वजः, सत्त्वे च नाट्यं प्रतिष्ठितम्, सत्त्वं च मनस्समाधानम्। तस्माद् भूयस प्रयत्नेन विना नाट्याभिनयो न सिद्ध्यतीत्यतः सात्त्विकाभिनय उपदिश्यते। सात्त्विकाभवे हि अभिनयक्रियानामपि नोन्मीलति। अभिनयनं हि "चित्तवृत्तिसाधारणतापत्तिप्राणसाक्षात्कारकल्पाध्यवसायसम्पादनं' भवति।

**'रसानाथर्वणादपि'**

वागङ्गसत्त्वसहकृतेन षड्विधाङ्गिकसामान्याभिनयान्यतर्भेनैव रसस्याभिव्यक्तिः स्यातं सामाजिकानां। तदर्थं रसनिष्पादने प्रयत्नः कविना कार्यः। विभावानुभावव्यभिचरिणां संयोजनेन रसश्चर्व्यमाणो भवतीत्थर्ववेदे विदितमेव। शान्तिकमारणादिषु कर्मसु नाट्स्येव तस्यर्त्विजः प्रशमवेपथ्वाद्यनुभावानां, प्रजाशत्रुप्रभृतीनाम् अवधानग्रहणादिना प्रधानविभावानाम् धृतिप्रमोदादिव्याभिचारिणां च परमार्थसता समाहरणं प्रधानमिति विभावादिरूपसामग्र्या रसात्मकचर्वणासम्भव इति रसनिष्पादनप्रक्रिया वेदाद् आथर्वणादधीता।

एवं स्वरालङ्कारादिसामग्र्युपस्कृतविवक्षाविशिष्टसवार्थार्पणक्षमा पाठ्याभिधा वाक् (वाचिकः) विशिष्टप्रयत्नपुरूषसम्पाद्यमनोऽवष्टम्भात्माः सात्त्विकः, रसाभिव्यञ्जनसापेक्ष आङ्गिकश्चेति अभिनयत्रयम्, नृत्तालङ्कारचतुरया कैशिक्या निर्वर्त्यमानस्याहार्यस्य

---

[1] अभि-भा(भा I), पु १४

(नेपथ्यस्य) उपस्कारके गोतातोद्ये चेति पञ्चैवाङ्गानि भवन्ति नाट्यस्य।[1]

यस्मादिमे पाठ्यादय उपादीयन्ते वेदेभ्यस्तस्माद् वेदा नाट्य वेदस्याङ्गानि कथ्यन्ते।

अयमत्र निष्कर्ष:। वाचिकासात्त्विकाङ्गिकास्त्रयोऽभिनया:, गीतम् आतोद्यं चेति पञ्च नाट्यस्याङ्गनि भवन्ति:, अङ्गी पुना रस एव। स एवात्माद काव्यस्य दृश्यस्य श्रव्यस्य च।

### अभिनये वृत्तीनां संयोजनम् ।[2]

यत् किल कर्मारभ्यते तत्र वाङ्मन: कायव्यापारस्तावदस्ति। उत्तमप्रकृतीनां सौष्ठवमय एव सर्वो व्यापार:। तेषु दृश्यमाना: कायावाङ्मानसानां विचित्रा व्यापारा भवन्ति वृत्तय:। ताश्व समस्तजीवलोकेषु सहजा: सत्य: अनादिकालादेवान्त: स्यूततया वर्तन्ते। एवं सति विशिष्टेन लोकोत्तरेण हृदयावेशेन युक्त व्यापारा नाट्यो पकारिणश्वत्कारो भवन्ति। तत्र वाग्वृत्ति: भारती, मनोव्यापार रूपा सात्त्वती, कायवृत्तिरारभटी, सौन्दर्योपयोगी व्यापार: कैशिकीति च कीर्त्यनते।

कविहृदये व्यवस्थिताभ्यश्चेष्टारूपाभ्यो वृत्तिभ्य: प्रयोग योग्यत्वम् अभिसन्धाय विनि:सृतं भवत्यभिनेयकाव्यम् इत्यतो भरत: स्वेन ग्रथितस्य नाट्यवेदस्य रूपकविशेषस्य प्रयोगाय स्वशिष्येषु नटेषु भारतीं, सात्त्वतीम्, आरभटीं च वृत्तिं संयोजयामास।[3]

---

[1] अभि-भा(भा I)

"अभिनयत्रय गीतातोद्ये चेति पञ्चङ्ग नाट्यम्।"

[2] ना.शा.(अ XX), का २५

ऋग्वेदाद् भारती क्षिप्ता यजुर्वेदाच्च सात्वती।
कौशिकी सामवेदाच्च शेषा चाथवणादपि ॥ अभि-भा (भा III), पु. ९०

[3] ना.शा. (अ I) का - ४१ अभि-भा(भा I) पु. २०, ना.शा. (अ XVIII) अभि-भा(भा II) पु. ४०८, ना.शा. (अ XX) अभि-भा(भा III) पु. ८२

यथा वागङ्सत्त्वानि सफलप्रवृत्तिजनकानि तथा न भवति केशाः। किञ्च ते देहस्य शोभादायिन एवासते। तद्वन्नाट्ये च सौन्दर्योपयोगी व्यापारो भवति कैशिकी वृत्तिः। सौन्दर्यहेतुत्वात् सा वाचिकाङ्गिकसात्त्विकानां प्रयोगाणां प्राणभूता भवति। तादृशी समुपरञ्जना वस्त्रमाल्यादिसुकुमारनेपथ्यविशेषेण, बहुविधगीतातोद्योपस्कृतैर्नृत्तैः कविनटसामाजिकहृदयव्याप्त्या रसभावनया, श्रृङ्गारबहुलीभावने च निर्वोढुं शक्यते। यद्यपि वागङ्गसत्त्वाभिनयपटवो भवन्ति मुनिशिष्यास्तथाऽपि निसर्गविषयाभिमुखचित्तवृत्तिविमुखास्ते कैशिकीविचित्रताम् आहर्तुं नैव प्रभवन्ति। नाट्यवैचित्र्यहेतुभूतायास्तस्याः प्रयोगे कुशलता निसर्गसुन्दरप्रकृतीनां स्त्रीजनानामेव भवतीत्यतो भरतमुनिः अप्सरःसुन्दर्यो नाट्यकुशलाः समानीय तासु कैशिकीवृत्तिं च संयोज्य नाट्यं प्रवर्तितवान् ।[1]

गीतातोद्याभ्यामुपरञ्जिता सती कैशिकीवृत्तिः प्रयोज्या। तदर्थं सशिष्यः स्वातिमुनिः नारदाद्याश्च गन्धर्वाः नर्तकीभिः मञ्जुकेशीप्रभृतिभिः सार्धं नाट्यकर्मणि नियोजिताः।

### नाट्यवेदस्य प्रयोजनानि।

[2] धर्मः, अर्थः, यशः, (श्रेयः), उपदेशपरता, साक्षात्कारकल्पत्वम्, अतीतस्य वर्तमानस्य भविनोऽपि जनस्य सर्वकर्मनिदर्शकत्वम्, सर्वशास्त्रार्थसम्पत्तिः, सर्वशिल्पप्रवर्तकता, इतिहासत्वं च नाट्यवेदस्य प्रयोजनानि भवन्ति।

यदेव प्रयोजनं वेदचतुष्टयादपि नोपलभ्यते तस्य प्रयोजनस्य सिद्ध्ये नाट्यवेदः समजायत। चतुर्वर्गोपायोपदेशः साक्षात्काररूपतयाऽस्मान्नाट्यवेदादेवोपलब्धुं शक्यते। सर्वोषामापि कर्मणां क्रियमाणानां पञ्चषादिभिरेव दिवसैः शुभाशुभतत्तत्कर्मानुरूपफलावाप्तिः अतीत रामादेरिव, वर्तमानस्य, भाविनोऽपि जनस्य प्रत्यक्षेण दर्शनमस्माल्लभ्यते।

---

[1] ना.शा. (अ I) का – ४५ – ५०, अभि-भा(भा I) पु. २३, ना.शा. (अ XX) का - ५३
[2] ना शा (अ I) का – १४-१५, अभि-भा(भा I) पु. १२ - १४

सत्स्वपि चतुर्षु पुरुषार्थेषु नानाधिकारिण: सर्वेऽपि जना: यथाकाममभुं नाट्यवेदम् अभिलषेयु:। लोके सर्वत्र सर्वजनानां हृदयेष्वास्वाद्यतया प्रथितत्वम् अस्यैव नाट्यवेदस्यास्ति।

न केवलं पुरूषार्थोपायोपदेशकोऽसौ नाट्यवेद:, किन्तु सर्वेषामपि कलाप्रधानानां शास्त्राणां गीतवाद्यादिभिरर्थै: सम्पत्ति:, सर्वेषां शिल्पानां चित्रपुस्तादीनामपि प्रवृत्तिश्चैकत्रैकस्मिन्नेव भवति। ज्ञानस्य हर्षपूर्वको विकासश्चास्मादेव लभ्यते।

एवमेकेनैव यत्नेन समस्तवस्तुसिद्धि: यस्माद् भवति स एव नाट्यवेद:।

**नाट्यवेदस्याधिकरी।**

[1] नाट्यवेदश्चैकं क्रीडनीयकं भवति, दृश्यश्रव्यात्मकम् एकं काव्यम्। न ह्येकान्तसुखिते काले देशे क्रीडया किञ्चित् प्रयोजनं, नाप्येकान्तदु:खिते।

एकान्तदु:खितस्य जनस्य क्रीडनीकेन न किञ्चित् प्रयोजनम्, यतस्तमोगुणाधिवासितचित्त: स विहितिधर्मस्याज्ञानेन कामवशाद् ईर्ष्यादीनां, राज्यलोभादे: क्रोधादीनां च वशग: सन् प्रवर्तते। तं धर्मे प्रवर्तयितुम् अधर्मान्निवर्तयितुं वा न काचिच्छक्ति: प्रभवति।

नाप्येकान्तसुखित: सात्त्विकोऽपि जन: क्रीडनीयकस्याधिकारी भवति। लोकपालप्रतिष्ठितजम्बूद्वीपसदेशमधिवासिता जना: स्वधर्मेऽवस्थिता: सत्कर्मानुष्ठानेनोत्कृष्टं स्थानमधिरोहन्ति। तान् धर्मे प्रवर्तैयितुम् अधर्मान्निवर्तयितुं वा न किञ्चिन्नूतनतयोत्पादनीयम्। लोकहितैषिण: सात्त्विका जना: निजसुखं प्रत्युपादेयतया, स्वदु:खं प्रति हेयतया वा न प्रयस्यन्ति।

[1] ना.शा. (अ I) का – ११-१३, अभि-भा(भा I) पु. १० - १२

ये किल राजसप्रकृतयो जनाः सुखं प्रेप्सन्ति, दुःखं जिहासन्ति ते शास्त्रीयेषु कर्मसु राजनियन्त्रणयैव प्रवर्तन्ते। तान् सुखदुःखपराधीनान् स्वधर्मानुष्ठाने चोदयितुमेव

दृश्यश्रव्यात्मकं प्रीतिव्युत्पत्तिप्रदवस्तु नाट्यात्मकम् अपेक्षणीयं भवति।

यद्यपि विमलप्रतिभानशालिहृदयाः सर्वेऽपि नाट्यमधिगन्तुं प्रभवन्ति तथाऽपि ये तु स्वरसत एव तावन्मानोज्ञविषयास्वादप्रवृत्ताः, अत एव वेदशास्त्रपुराणादिभीरुहृदयाश्च, येषां च रसास्वादनपूर्वमेव पुमर्थेपायावगतिर्भवेत् त एवास्मिन् नाट्यवेदे व्युत्पाद्यतयाऽधिकारिणो भवन्ति।

**इन्द्रध्वजमहकथाया नाट्यरूपता ।**[1]

लोकपितामहान्नाट्यवेदं गृहीत्वा तदाज्ञामनुसृत्य भरती नाट्य प्रयोक्ता भवन् लोकस्य च गुणेप्सया शिष्यगणं नाट्यप्रयोगमभ्यासयामास। अथ स भारतीसात्त्वतीकैशिक्यारभटीश्चतस्रो वृत्तीरपि नाट्ये प्रयोगायोपशिश्रे। स्त्रीजनादृते कैशिकीवृत्तेरप्रयुज्मानत्वात् श्रृङ्गाररससम्भवायास्तस्याः प्रयोगाय नाट्यालङ्कारचतुराः मञ्जुकेशीप्रभृतीरप्सरसः सृष्ट्वा ब्रह्मा भरताय प्रादात्। एवं नाट्य वृत्तिचतुष्टयसम्पन्नैका गुणनिका समभवत्।

अनन्तरं च तद् गीतवाद्यादिभिरुपरञ्जयितुकामो ब्रह्मा स्वातिमुनिं तच्छिष्यैः साकं पणवमृदङ्गझल्लार्यादिभिस्त्रिपुष्करवाद्यस्य संवादने, नारदादीन् गानगन्धर्वान् वीणावेणुमृदङ्गादिभिस्तरङ्गितस्य सङ्गीतस्य च सङ्कीर्तने नियोजयामास।

इन्द्रध्वजमहे सम्प्राप्ते स एव समयो नाट्यप्रयोगस्येति पितामहेनादिष्टः प्रतीक्षितलब्धावसरो भरतः निहतासुरदानवं महेन्द्र विजयोत्सवम् इतिवृत्तमवलम्ब्य, तदनुसृत्य प्रहृष्टामरसङ्कीर्णस्य समवकारस्य रूपकविशेषस्य प्रयोगदर्शनाय समारभत।

---

[1] ना.शा (अ I) का – २४-१०८

पूर्वम् आशीर्वचनसंयुताऽष्टाङ्गपदसंयुक्ता विचित्रा नान्दी प्रयुक्ता। नान्द्यन्ते कृता तावत् प्रस्तावना, या रोषग्रथितवाक्यैः संफेटैः, शङ्काभयत्रासकृता विद्रवेण

शस्त्राहवेन छेद्येन, मल्लयुद्धात्मकनियुद्धेन भेद्येन च सहिताऽभूत्।

नाट्यप्रस्तावनाप्रयोगादेव परितुष्टा ब्रह्मादयो देवा भरतशिष्येभ्यो सर्वाण्यपि नाट्योपकरणानि प्रददुः। इन्द्रो ध्वजं, ब्रह्मा कुटिलकं, वरुणो भृङ्कारं, सूर्यश्छत्रं, शिवः सिद्धिं, वायुर्व्यजनं, विष्णुः सिंहासनं, कुबेरो मुकुटं सरस्वती श्राव्यत्वं, यक्षराक्षसपन्नगाः गन्धर्वाश्च भाषितं (तत्तदभिनयोपयोगिवाचिके शिक्षां), भावान् (विभावादिषु शिक्षा) रसान् (स्वोचिनस्थायिभावसम्बध्यमानतत्तद्रसोपयोगिनोऽनुभावव्यभिचारिवर्गस्य शिक्षां), बलं (आङ्गिकशक्तेः शिक्षा), क्रियां (परिषदः पुरस्कृत्य तत्परितोषकारिकां शिक्षां) च यथाशक्ति यथायोग्यम् अभिनेतृभ्यो ददुः।

### दैत्यानां क्रोधोद्भवः।

एवं देवतापरितोषितैः सर्वैरपि सामग्रीविशेषैः प्रयोगे प्रारब्धे दैत्यदानवनाशनसूचकम् इतिवृत्तं समालोक्य परिषदि सन्निहिता दैत्याः क्षुभिताः सन्तो विरूपाक्षं पुरोधाय विघ्नकारिणो भूत्वा समुद्घोषयन् 'न क्षमिष्यामहे नाट्यमेतद्, आगम्यताम् वयमेतद् दृष्ट्वा न क्षमिष्याहे, विरमन्तामेतस्मान्नट्यप्रयोगाद् इति। ततस्ते मायाशक्त्या नाट्यसम्बन्धि वचः, चेष्टां, स्मृतिं, नृत्यं च स्तम्भयन्ति स्म। सूत्रधारप्रभृतिः सर्वोऽपि नटवर्गो नष्टसंज्ञो जडीकृतश्चाभवत्।

निश्चलमेतं रङ्गं, रङ्गजीठमुपामम्य समावृत्तं विघ्नगणं च दृष्टवा शक्रः स्वध्वजमुद्धृत्य जर्जरीकर्मणा तत्र वीक्षितान् असुरान् भस्मसादकरोत्।

### नाट्यवेश्मनिर्मितिः।

पूर्वस्मादप्यौत्सुक्यात् पुनःसमारब्धे नाट्यप्रयोगे तत्रावशिष्टाश्च दैत्याः सदासि प्रादुर्भूय मुहुर्नाट्यविनाशाय नटानां त्रासं जनयामासुः। ततो भरतमुनिः शिष्यैः साकं पितामहमुपेत्य नाट्यकर्मणः शाश्वतीम् एकां रक्षाविधिं प्रार्थयामास। तां निशम्य तु

ब्रह्मा देवशिल्पिन विश्वकर्माणमाहूय सर्वलक्षणसम्पन्नमेकं नाट्यवेश्म झटित्येव निर्मातृमाज्ञापयामास। अचिरादेव निर्माय सुमनोहरमेकं नाट्यवेश्म ततोऽभ्युपेत्य 'सर्व सज्जम्' इति त्वष्ट्रा विज्ञापितः पितामहः सर्वैर्देवैः सार्धं तदवेक्षितुं प्रतस्थे। तत्र तद्दर्शनेन परितुष्टः स च नाट्य वेश्मनो रक्षार्थम् अंशभागैरेकैकान् देवान् नियोजयामास।

### दैत्यानां क्रोधस्य कारणोक्तिः।

'सामवचनेन विघ्नकारिणो दैत्याः स्थापनीयाः' इति देवानां प्रार्थनामाकर्ण्य ब्रह्मा विघ्नकारिणो दैत्यान् प्रति तेषां नाट्यविनाशसंरभे कारणमपृच्छत्। अनुयायिभिः सह तत्रासीनो विरूपाक्षः समाधत्ते-

'सुराणामिच्छया तेषां परं पारितोषाय ब्रह्मणा सृष्टोऽयं नाट्यवेदो दैत्यानां तिरस्काराय फलति। यस्माद् यथा देवास्तथा दैत्या अपि ब्रह्मणः समुद्भूतास्ततो लोकपितामहेन तत्र भवता नैतादृशमनुचितम् एकतरपक्षपाति कर्म कार्यम्' इति।

### नाट्यगुरोर्ब्रह्मदेवस्य समाधानवचनम्।

दैत्यैर्निवेदितं सश्रद्धमाकर्ण्य ब्रह्मा प्रत्यवादीत्। मिथ्याज्ञानकृतसर्पत्रासवद् भ्रान्तिकृतो भवति दैत्यानां मन्युः। दैत्याः कर्मसु पराजिता भवन्तोऽशुभकारिणो भवन्तु, देवाः पुनरन्यथेति न नाट्यस्य तात्पर्यम्। अत एव दैत्यानामपि धर्मादौ सदुपायः शुभपरिपाकत्वेन दर्शितः। सर्वथा जनानां कर्मभावविधिः सह सुतरां संबद्धो भवत्ययं नाट्यवेदः। दान, स्नानम्, इत्यादि धर्मः, हिंसा, स्तेयम् इत्याद्यधर्मश्चेति जनानां द्विविधं कर्म, स्वार्थतापरार्थताद्यभिसन्धिरूपस्तेषां स्वभावः, आर्यावर्तादिदेशसम्बन्धी ब्रह्मण्यादिवंशसंबन्धी च तेषाम् अन्वयः इत्येतत्त्रितयानुसारिणैव प्रतिपादनेन देवानाम् असुराणाञ्च शुभाशुभविकल्पो नाट्यवेदः समाहृतो भवति। किञ्च स तावद् गुरूरिव न कर्मण्युपदिशति, यथा अस्मिन् काले ईदृशेन कर्मणा यः शुभम् अशुभं चार्जति स एवंविधफलभागी भवेद् इति। किन्तु, शुभकारी शुभं फलमश्नुते, अशुभकारी चाशुभं फलमिति शुभम् अशुभं च धर्माधर्मरूपं सुखदुःखफलत्वेन विभेदेन सर्वेषां साक्षात्काररूपतया प्रदर्शयति परं नाट्यवेदः। न तत्र देवेषु, दैत्येषु, तदितरेषु वा जनेषु कश्चिद् भरः।

## नाट्यं लोकवृत्तानुकारणम् । [1]

लोकवृत्तानुसारेण करणं प्रयोगरूपं भवति नाट्यम्। जनानां कर्मभावादय: तत्तदुचितेषु विन्यस्य नाट्ये प्रदर्श्यन्ते। यथा धर्मप्रवृत्तानां रामयुधिष्ठिरादीनां सम्बन्धित्वेन धर्म: प्रयुक्तो भवति। एवं कामोपजीविनां सम्बधित्वेन काम:, तथा दुर्विनीतानां वध:, विनीतानां जितेन्द्रियाणां शम:, क्लीबानामुपहास्यानां हासजननं धार्ष्ट्यम्, अबुधत्वेन प्रसिद्धानां सम्बन्धित्वेनोपायोपदेशाद् विबोध: व्युत्पाद्यत्वं, विदुषां भीष्मादीनाम् उपायव्युत्पाद्यत्वेन वैदुष्यं-स्मृति-मतिप्रभृतयश्च, ईश्वराणां सम्बन्धित्वेन लीलाविनोदनं, दु:खार्दितानुद्दिश्य व्यवसायात्मकं स्थैर्यं, पुरुषार्थोपायव्युत्पाद्यानां तादृशार्थव्युत्पत्ति: उद्विग्नचित्तानुद्दिश्य धैर्यं चानुकीर्तितं भवति नाट्ये।

लोकवृत्तानुसारेण यत इयं नाट्यक्रिया, लोके च धर्मादयो नानाश्रया: न संवेदनयोग्या: तस्माद् धर्मादिविषये यो यथा प्रसिद्धो रामादि: स शब्दमात्रोपयोगित्वेन मुख्यया प्रणालिकया गृहीत:।

## नाट्यं भावानुकीर्तनम् भावानुकीर्तनं रस:।

[2] लोकत्रयवर्तिनाम् उत्तमाधममध्यमानां त्रिप्रकृतीनामपि जनानां चित्तवृत्तेर्भावस्थानुकीर्तनं भवति नाट्यम्। अनुकीर्तनं नामानुव्यवसायविशेष:। नाट्यप्रकाशितानुव्यसायात्मिकायाम् अनुभूतौ भावुकानामारोहणाय भवन्तीमा: श्रेणय:।

1. प्रस्तावानाकालिकटनटज्ञानसहकृतेन सात्त्विकवाचिकाङ्गिकाहार्याभिनयचतुष्ट्येन नटस्य स्वरूपप्रच्छादने सति अस्मिन् कालेअस्निम् देशे वर्तमान: 'चैत्रोऽयं नट:', 'मैत्रोऽयं नट:' इत्यादिविशेषा, कारप्रत्यक्षज्ञानस्य निवृत्ति:,

[1] ना.शा. (अ I) का –१०८-११५

[2] ना.शा. (अ I) का – १०७, अभि-भा(भा I) पु. ३५ – ३७

2. विशेषावधरणप्रधानप्रत्यक्षज्ञानस्यापसरणानतरं सामान्याकारप्रत्यक्ष, ज्ञानस्योत्पत्ति:;

त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम् ।

3. प्रख्यातवस्तुविषयत्वेन प्रख्यातोदात्तनायकत्वेन चादरणीयचरितस्य रामादे: शब्दस्य प्रयोगान्नटे रामादिनायकत्वासंभावनाया: निराकरणेन ज्ञानात्मकस्यानुव्यवसायस्य साक्षात्कारायमाणता;

4. हृदयातोद्यादीनामनुस्यूततया प्रवाहेण रत्यादिभावानां चमत्कारजनकत्वाद् हृदयानुप्रवेशश्च ।

एवं रञ्जकसामग्रीमध्यानुप्रष्टेन प्रच्छादितस्वस्वभावेन प्रयोक्त्रा नटेन दृश्यमानेन, पूर्ववृत्तलौकिकप्रत्यक्षानुमानादिसंस्कारसहितानां, सहृदयता-संस्कारसहकृतानां हृदयसंवादतन्मयीभवनसहकारिणां सामाजिकानां हृदये यो ज्ञानविशेष उत्पद्यते स एवानुव्यवसाय: । सुखदु:खाद्याकारतत्तच्चिवृत्तिरहित:, स्वप्रकाशानन्दमय: अत एव: विचित्ररूपोऽसौ रसना, आस्वादनं, चमत्कार:, चर्वणा, निर्वेश भोग इत्यादिभिर्विविधैर्नामभिर्व्यवह्रियमाणो दृश्यते । एतादृशेऽस्मि अनुव्यसाये यदवभासते तदेव नाट्यम् ।

एवं च 'नाट्यं भावानुकीर्तनम्' इति मुनिवचने अभिनवगुप्ताचार्यदिशा नाट्यपदस्य रस इत्यर्थो लभ्यत इति भावानुकीर्तनम् इत्यस्यापि रस: एवार्थ: । तत: 'त्रैलोक्यस्यास्य सर्वस्य भावानुकीर्तनं रस:' इत्यायातम् । कालदेशप्रमात्रादिसंस्पर्शविहीनरत्यादिचित्तवृत्तीनां केवलानां सरधारणीकृतानां प्रत्यघमर्शो रस:, तादृशभावादीनाम् आस्वादमयत्वात् । तथा चोक्तम् अभिनवभारत्याम्,

ग्रीवाभङ्गाभिरामं मुहुरनुपतति
स्यन्दने बद्धदृष्टि:
पश्चार्धेनन प्रविष्ट: शरपतनभयाद्
भूयसा पूर्वकायम् ।

छर्भैरर्धावलीढैः श्रमविवृतमुख
भ्रांशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद् वियतित बहुतरं
स्तोकमुर्व्या प्रयाति।

इत्यादिभ्यो वाक्येभ्यो वाच्यार्थप्रतिपत्तेरनन्तरं मानसी साक्षात्कारात्मिकाऽपहस्तिततत्तद्वाक्योपात्तकालादिविभागा तावत् प्रतीतिरूपजायते। तस्यां च यो मृगपोतकादिर्भाति तस्य विशेषरूपत्वाभावाद्, भीत इति त्रासकस्यापारमार्थिकत्वाद् भयमेव वरं देशकालाद्यनालिङ्गितम्। तत एव 'भीतोऽहं', 'भीतोऽयं', 'शत्रुः', 'वयस्यो', 'मध्यस्थो', वेत्यादिप्रत्ययेभ्यो दुःखसुखादिकृतहानादानादिबुद्ध्यन्तरोदयनियमवत्तया विघ्नबहुलेभ्यो विलक्षणं निर्विघ्नप्रतीतिग्राह्यं साक्षादिव हृदये निविशमानं, 'चक्षुषोरिव विपरिवतमानं भयानको रसः' इति।

यदा भावो वीतविघ्नप्रतीतिग्राह्यो भवति तदा स औचित्याद् रस इति व्यपदिश्यते रस्यमानतासारत्वात् तस्य 'त्रैलोक्यस्याय सर्वस्य भावानुकीर्तनम्' इति भावानां साधारणीकरणमुच्यते। तस्य च भावस्य मानसी साक्षात्कारात्मिका प्रतीतिरेव 'अनुकीर्तन' शब्देन परामृश्यते। एवं चानुकीर्तनं नाम अनुव्यवसायः मानसी साक्षात्कारात्मिका प्रतीतिरेव।

साधारणीकृता रत्यादिचित्तवृत्तयो भावाः हृदयसंवादतन्मयीय वनक्रमेण वीतविघ्नप्रतीतिग्राह्याः साक्षात्कारात्मकाः रस्यमानतैकसारारसा इत्युच्यते। तस्माद् रस एव नाट्यम्। तच्च देवानाम्, असुराणां, नराणां चोत्तमाधममध्यानां प्रकृतीनां सममनुगुणमेव।

# काव्यस्य प्रयोजनं लक्षणञ्च

## काव्यस्य प्रयोजनम्

वाल्मीकि-कालिदासाऽऽदीनां कवि- पुङ्गवानां काव्यं पठित्वा सहृदयरासिकानाम् परमानन्द-लहरी-परिपूरित-गम्भीर-निजहृदयाह्लाद रतानाम् रस-चर्वणा-समये परमानन्दाह्लाद करो भवति। अत: काव्य-प्रयोजन-पर्यालोचन-प्रसङ्गे आनन्द एव काव्यस्य मुख्यं पार्यन्तिकं फलम्।[1] यद्यपि भामह-भटट्रोद्भट-मम्मट-प्रभृतिभिराङ्का-रिकैरन्यान्यपि धर्माऽर्थकाम-मोक्ष कलावैचक्ष्ण्यादीनि शिवेतरक्षत्यादीनि च काव्यस्य प्रयोजनानि समुदीरितानि [2] परं काव्यस्य यदि नाऽऽनन्दे पर्यवसानं तर्हि शास्त्रेतिहासाऽऽदिभ्योऽस्य काव्यस्य विदग्धजनाऽऽस्वाद्यस्य किंनिमित्तं वैलक्षण्यं भवेत्। चतुर्वर्ग प्राप्त्युपायान् वेद-शास्त्रेतिहासादीनधीयानो लोकस्तेषु काव्यानुशीलनसमुद्भूतस्य विगलितवेद्यान्तरस्य गिरमतीतस्य रस-रूपिण: परमानन्दस्यांऽशमात्रमपि नाऽऽस्वादयति। ब्रह्मानन्द-सहोदरो ह्यसावानन्द: स्वानुभूति-समयेऽन्यत् सर्व तिरोदधत् काव्यस्य पठनाच्छवणाद् दर्शनदेवाऽऽस्वाद्यते, अत: काव्यैवाऽसौ कश्चित् वक्तव्य-विशेष:। आनन्दमन्तरा काव्यस्य कि वैशिष्ट्यं प्रभुसम्मित-वेदाऽऽदिशास्त्रेभ्य: सुहृत्-सम्मिम-पुराणेंतिहासादिभ्यश्च।[3] अत: सत्स्वपि काव्यस्याऽन्येष्वनिष्ट-ताप-शमनादिषु प्रयोजनेष्वानन्द एव तस्य मुख्यं प्रयोजनयं स्वीकरणीयम्। ये च राजपुत्र-प्रभृतयोऽवश्यं संस्करणीयास्तेऽपि हृदयाह्लाद-क्षमस्य कावयस्याऽनुशीलनात् परमानन्द-लहरी-निमज्जन-विशदीकृताऽन्त:करणा लोक-शास्त्र व्यवहार-निपुणा व्युत्पन्नाश्च भवन्तीत्यानन्द एव तत्र प्रयोजक: । यद्यानन्दाऽनुभूतिर्न स्यात् काव्यात्,तर्हि राजपूत्रादीनामन्येषाञ्च कठोर-मतीनां प्रवृत्तिरेव न स्यात्। परं काव्य-मुखन रसास्वादसुखमनुभवन्तस्ते धर्माऽधर्म-विवेकं प्राप्नुवन्तीति रसास्वाद एव काव्यस्य मुख्यं प्रयोजनं प्रतिपत्तव्यम्।

यद्यपि काव्यं लोकान् शुभे कर्मणि प्रवर्तयति, अशुभाच्च निवारयति, परं काव्यस्य न केवलं व्यवहार-ज्ञान एवोपयोगिता, अपितु सहृदय-हृदयाह्लादकत्वेऽपि।

[1] "सकलप्रयोजन मौलिभूत समनन्तरमेवरसास्वादनसमुद्भूतम्" मम्मट. काव्यप्रकाश 1,2।

[2] "चतुर्वर्गफलप्राप्ति. सुखादल्पाधियामपि काव्यादेव पतस्तेन तत्स्वरूपं निरूप्यते।" -भामह. काव्यालंकार 1, 10।

[3] काव्यप्रकाश मम्मट प्रथम उल्लास 1, 2।

कवे: काव्य-प्रयोजनं यश: प्राप्ति-धनोपार्जनाऽनिष्ट-नाशादिकमपि भवेन्नाम्, परं रसाऽऽवादयितु: सहृदयस्याऽऽनन्द एव मुख्यं पर्यवस्यति। काव्य-रसाऽऽस्वाद-समये रसयिता सहृदय आनन्द-सन्दोहे प्लवमानो नाऽन्यत् किञ्चिद् ज्ञातुं प्रभवति। आनन्द-कल्लोल-परिपूरित-निज-हृदय-हृदय-सागर: सन् रस्यमानता-सारैकप्राणं रसमास्वादयन् सहृदयो न किञ्चिद् वेत्ति शुभमशुभं वा रसाऽनुभूति-समये। एवं हृदय-संवादिनि रस-चर्वणाऽऽत्मके परमानन्दे सर्वत्र व्याप्ते नाऽयत् किञ्चिदवशिष्यते, परमाऽऽह्लाद्-महोदधि-तरङ्गसमुल्लासमन्तरा।

भामहादि-पण्डितराजजगन्नाथान्तानां सर्वेषामालंकारिकाणां मतेन काव्यस्य प्रयोजनेष्वानन्द एव मूर्धन्यतामवगाहते। तथाहि- 'धर्माऽर्थकाममोक्षेषु कलासु च वैचक्षण्यं काव्य-कृतम्' इति वदताऽपि भामहाऽऽचार्ये 'करोति कीर्तिं प्रीतिञ्च साधु-काव्य-निवेषणम्' इति च प्रदर्शयता प्रीतिरेव काव्यप्रयोजनत्वेनाऽभ्युपगता। मम्मटभटट्नाऽपि 'काव्यं यशसेऽर्थकृते' इति व्याहरताऽपि सद्य: परनिर्वृत्ति-करणेन निर्वृत्तिरेव काव्यस्य प्रमुखं प्रयोजनं समाख्यायि। रसिक-जन-ललाम-भूतेनाऽभिनवगुप्तपादाऽऽचार्येणाऽपि स्वकीये ध्वन्यालोक-लोचने यद्यपि 'श्रोतृणां व्युत्पत्तिप्रीति यद्यपि स्त:, यथोक्तम्- धर्मार्थकाम-मोक्षेषु वैचक्षण्यं कलासु च' इति प्रदर्शितम, तथाऽपि 'त्तत्र प्रीति रेव प्रधानम्' इति लिखता काव्य-प्रयोजनेषु प्रधान्येन स्वीकृता।[1]

रस-प्राधान्य-वादिनो भटट्नायकस्याऽपि मतम्-
वाग्धेनुर्दुग्ध एतं हि सरं यद्बालतृष्णया।
तेन नाऽस्य सम: स स्याद् दुह्यते योगिभिर्हिय:।।[2]

इत्येवमुपस्थपयताऽभिनवगुप्तपादाचार्येण तस्याऽऽनन्द एव दृढ: सम्प्रत्यय: प्रादर्शि।

[1] धर्मर्थिकाम मोक्षेषु वैचण्यं कलासु च। करोतिकीर्ति प्राप्तिं च साधुकाव्य निशेवणम।।
-भामह काव्यालंकार 1, 2।

[2] भटटनायक:।

दशरूपकेऽवलोककारेण धनिकेनाऽपि निरतिशय-सुखाऽऽस्वाद-व्यतिरिक्तं नाऽन्यत् प्रयोजनं काव्यस्येति प्रोद्घोषयताऽऽनन्दानुभूतिरेव काव्यस्य परमं प्रयोजनमिति सिद्धान्तितम्। यथोक्तम्-

'काव्य-शब्दानां चाऽन्वय-व्यतिरेकाभ्यां निरतिशय-सुखऽऽस्वादव्यतिरेकेण प्रतिपाद्य-प्रतिपादकयो: प्रवृत्ति-विषययो: प्रोजनान्तराऽनुपलब्धि: स्वाऽऽनन्दाऽनुभूतिरेव कार्यतवेनाऽवधार्यते' इति।

वक्रोक्ति-जीवितकास्य कुन्तकस्याऽपि पार्यन्तिके प्रयोलन आनन्द एव दृढ़ाऽऽस्था। याथेक्तम्-

चतुर्वर्मफलास्वादमप्यतिकम्य तद्विदाम्।
काव्यामृतरेनान्तश्चमत्कारो वितन्यते।। इति।।[1]

अनेन स्फुटं प्रतिपद्यते यद् वेद-पुराणेतिहासादिभ्य: काव्यस्य न कश्चिदपकर्ष: प्रत्युत वेद-पुराणाऽऽदिष्वानन्द-कणस्याऽप्यननुभवाद् दु:खेन प्रवृत्ति:। काव्ये त्वानन्दलहरीसमुच्छलनेनाऽप-मतीनां शास्त्र-पराङ्गमुखानामपि सुखेनैव प्रवृत्तिर्भवतीत्यानन्द एव परमं प्रयोजनं काव्यस्य।

**काव्यस्य लक्षणम्-**

ननु प्रीति-प्रधानस्य काव्यस्य किं लक्षणमिति जिज्ञासायां 'शब्दार्थौ सहितौ काव्यम्' इति भामहाचार्येणाऽऽदौ स्वकीये काव्यालंकाराऽख्यग्रन्थे भणितम।[2] अन्यैरपि वामन-रूद्रट-मम्मट-हेमचन्द्र- विद्याधरप्रभृतिभिराचायै: शब्दार्थयो: साहित्य-लक्षणं काव्य-स्वरूपं प्रतिपादितम्। भामहोपज्ञमिदमेव शब्दार्थयो: साहित्य-प्रस्थानं काव्य-लक्षणमंलकारग्रन्थेषु प्रसिद्ध। आचार्यो दण्डी शब्दाऽर्थयोस्तुल्य-प्रधान्यमानोऽर्थोपसर्जनकं शब्द-प्रधानं काव्य-लक्षणमाम्नाति। रमणीयार्थ-प्रतिपादक: शब्द: काव्यम् इति वदता पण्डितराज-जगन्नाथेनाऽपि दण्डि-मतमेवोपोद्बलितम् इदमेव शब्द-प्राधान्यप्रस्थनम्।

---

[1] वक्रोक्तिजीवितम् कुन्तक:।
[2] काव्यालंकार भामह।

परं काव्यत्वं न केवलं शब्दाऽर्थयोरेनाऽवशिष्टम्। शब्दार्थाऽतिरेकी कोऽप्यन्य: काव्यस्य धर्म आत्म-स्थानीयो वक्तव्यो भवति। स चाऽऽत्मा रीतिरात्मा काव्यस्येत्यभिदधता वामनेनाऽऽदौ निर्दिष्ट:। परमस्ति महत्यत्राऽश्रद्धा ध्वनिकार-पृष्ठाऽनुगानमलंकारिकाणाम्। भट्टोद्भटादिभिर्व्याकृता अनुप्रसोपमादयोऽलंकारा:, वैदर्भी:-पाञ्चालीप्रतयश्चाऽवयव-संस्थानीयारीतय: शब्दार्थ-व्यतिरिक्तास्तावन्न दृश्यन्ते, तासां काव्य-कामिनी-शरीर-भूत-शब्दार्थेष्वेव पर्यवसानात्। वैदर्भी-प्रभृतयो रीतयोऽगंभूता एव, अतो न ता अङ्गित्व-पदवीमधिरोढुं प्रभवन्ति। नहि हस्त-पादोररादीनामवयवाना संस्थान-विशेष एवाऽऽत्मत्वेनाभ्युपगतो भवति। वामनस्य काव्य-लक्षणे त्वियान् एव विशेषो यद् भामहादिभि: शब्दर्थयो: साहित्य-लक्षण काव्य-स्वरूपे न काव्यस्याऽऽत्मा प्रोक्त:। परं वामनेन रीतिरात्मत्वेन स्वीकृता। अत: काव्यस्याऽऽत्मनाऽपि केनचिद् भाव्यम् इत्यत्राऽऽदौ वामनाऽऽचार्येणैव विचार: कृत:। रीतेरात्मत्वमुपपद्यते न वेति त्वन्यत्।

आन्नदवर्धनाऽऽचार्येण ध्वनि-प्रस्थान-प्रजापतिना रीतेरात्मत्वं दूषयता कोऽसौ काव्यस्याऽऽत्माऽऽनुप्राणको जीवातु-भूत इति सूक्ष्मेक्षिकया गवेषयता काव्यस्याऽऽत्मा ध्वनिरिति ध्वनिरेव काव्यस्याऽऽत्मा प्रोक्त:। पश्चाच्च तन्-मतोपोद्बलकेनौभिनवगुप्तपादाऽऽचार्येण युक्त्यवष्टम्भपूर्वकं रस-ध्वनिरेव काव्यस्याऽऽत्मा निरधारि। साहित्यदर्पणकारेण विश्वनाथाचार्येणापि वाक्यं रसात्मकं काव्यम् इति व्याहरता काव्यस्यात्मा रस एव प्रत्यपादि।

एवं काव्यलक्षणनिरूपणप्रसङ्गे केचिच्छब्दार्थसाहित्यवादिन:, अन्ये शब्दप्राधान्यवादिन:, इतरं रीतिवादिन:, अपरे ध्वनिपक्षपातिनश्चाचार्या विसंवादि काव्यलक्षणमुपनिबघ्नन्ति।

**जगन्नाथकृतं काव्यलक्षणम्**

तथाहि-शब्दप्रधान्यवादिनो जगन्नाथादय आचार्या: शब्दार्थसाहित्यवादिनां मतमित्थं दूषयन्ति। न च काव्यपदेन यद्गृह्यते तच्छब्दार्थयो: समानभावेन व्याप्तम् उत शब्देऽर्थे च पृथकपृथग्भावेनावशिष्टमिति वाच्यम्, नाद्य: काव्यपदप्रवृत्तिनिमित्ते

शब्दार्थयोर्व्यासक्ते सति श्लोकवाक्यस्य काव्यत्वानङ्गीकार व्यवहारप्रसङ्गात।[1] अयमाशय:। यथा द्वित्वं द्वयो: पदार्थयोर्व्यासक्तं नैकस्मिन् पदार्थे समुपलभते, तथा कव्यत्वमपि शब्दार्थयोर्व्यासक्तं सन्न कथमपि श्लोकवाक्ये काव्यवयवभूते प्रसक्तं भवति। न च तथेष्टापत्ति:। श्लोकवाक्यानामपि काव्यवयभूतत्वेन काव्यत्वानपलपनीयत्वात्। यथा घटपटोभयवृत्तिर्द्वित्वधर्मो न घटे न वा घटे पृथक्पृथग्दृश्यते, अपितु घटपटोभयो: समानभावेन तद्व्यासक्तं सत् काव्यावयवभूवे श्लोकवाक्ये नैव सङ्गतं भवतीति व्यवहारपराहत: पूर्व: पक्ष:। न द्वितीय:। काव्यस्य शब्देऽर्थे च पृथक्पृथग्भावेनावशिष्टे, एकस्मिन्नेव पद्ये शब्दार्थोभयकाव्यव्यवहारापत्ते:। तच्चानिष्टम्। न केनचिदपि शब्दकाव्यामिदञ्चार्थकाव्यामिति व्यवह्रियते। अत: शब्दार्थेभयनिष्ठतंव काव्यस्य नोपपद्यते, परं काव्यं श्रुतमर्थो न ज्ञात इति विश्वजनीनव्यवहारत: शब्द: काव्यमित्येव काव्यलक्षणमुपपन्नं भवति।

### नागेशभट्टकृतं जगन्नाथमतप्रत्याख्यानम्

पण्डितराजजगन्नाथकर्दमितं भामहोपज्ञं सहित्यप्रस्थानं रसगङ्गाधरटीकाकारेणैव नागेशभट्टेन पङ्कप्रक्षालनं कुर्वता एवमनाविलं कृतम्।[2] तथाहि-तत्र काव्यत्वप्रयोजकं रसास्वादव्यञ्जकत्वं नाम शब्दार्थयो: समानभावेन व्याप्तम्। नहि काव्यमुच्चै: पठ्यते, काव्यदर्थोवगम्यते, काव्यं श्रुतमर्थो न ज्ञात इति विश्वजनीनव्यवहार एव शब्दविशेषस्यैव काव्यपदार्थत्वमुपोद्बलयति, प्रत्युत काव्यं पठितं काव्यं श्रुतं काव्यमवबुद्धिमिति लोकव्यवहारस्यापि, दर्शनात् काव्यत्वं व्यासज्यवृत्तिर्धर्म एवाशिष्यते। किञ्च तदधीते तद्वेद (5.2.89) इति पाणिनिसूत्रं व्याकुर्वता भगवता पतञ्जलिना वेदशास्त्राणामुभवयवृत्तित्वं समर्थितम्। तथा सति काव्यस्यापि व्यासज्यवृत्तित्वमङ्गीकार्यम्। अन्यथा तदधीते तद्वेद इति वचनस्य का सङ्गति:। अत एव मम्मटादिभि: प्रोक्तं शब्दार्थसाहित्यस्वरूपं काव्यलक्षणमनुपहसनीयम।

### विश्वनाथकृतं मम्मटप्रतिपादितकाव्यलक्षणखण्डनम्

[1] अपि च काव्यपदप्रवत्तिनिमित्तं शब्दार्थयोर्व्यासक्तम, प्रत्येकपर्याप्तं वा, नाद्य:, एको न द्वाविति व्यवहारस्येव 'श्लोकवाक्यं, न काव्यमि'ति व्यवहारस्यापत्ते:। न द्वितीय., एकस्मिन् काव्ये काव्यद्वयव्यवहारापत्ते:। पण्डित:, दुर्गाप्रसाद., जगन्नाथविरचित: रसगंगाधर., पृ. 7।

[2] तत्रैव, नागेशकुता टीका, पृ 7।

तत्र अदोषौ इत्यत्य खण्डनम्।

रसात्मवादिना विश्वनाथेनापि शब्दार्थसाहित्यवादिनो मम्मटाचार्यस्य **तद्दोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि**[1] इति काव्यलक्षणं कटाक्षितम्। तथाहि- अदोषाविति शब्दार्थविशेषताधायकं काव्यलक्षणघटकं पदं न निर्दोषम्। सर्वथा दोषविनिर्मुक्तस्य काव्यस्यासम्भवत्वात्। **न्यक्कारो ह्यमेव मे यदरयस्तत्राप्यसौ तापसः**[2] इत्यादि यदुत्तमस्य ध्वनिकाव्यस्योदाहरणमुपन्यस्यते तत्र विधेयाविमर्शदोषदर्शनात् काव्यत्वमेव न स्यात् का कथा ध्वनेः। न च यदंशे दोषस्तत्राकाव्यत्वं यदंशे दोषाभावस्तत्र काव्यत्वमिति वाच्यम्, तथा सति पद्यस्यैकस्यैव दुष्टत्वादुष्टतवाच्च काव्यत्वाकाव्यत्वनिर्णयाभाव प्रसंगात्। नहि श्रुतिकटुप्रभृतयो दोषाः काव्यस्य कञ्चिदेवांशं दूषयन्तो दोषा उच्यन्ते, प्रत्युत श्वित्रलेशेन समग्रस्य वपुषो यथा दुर्भगत्वं तथैव सर्वमेव काव्यं तैर्दूषितं भवति। यथोक्तं दण्ड्याचार्येण काव्यादर्शे-

तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन।
स्याद् वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम्।।[3]

ब्रह्मणा निर्मितं जगदपि यदैकान्तं निर्दुष्टिं न भवति, तदा पुरुषकृतस्य काव्यस्य कथं सर्वथा निर्दोषत्वमुपपद्यते। अतो मम्मटकृतकाव्यलक्षणे अदोषौ इति काव्यलक्षणघटकविशेषणपदोपादानेन काव्यपदप्रवृत्तिनिमित्तं कालिदासादीनां रघुवंशमेघदूतादिप्रणयनकर्म काव्यपदव्यपदिष्टं न स्यात्। तथा सति किमसौ काव्यमिति स्वरूपविवेकोऽपि कर्तुं न शक्येत् लक्ष्यस्यादर्शनात्।

अतः कीटानुविद्धं रत्नं यथा न रत्नत्वात् परिभ्रश्यते, सकीटस्यापि तस्य लोके रत्नपदव्यपदेश्यत्वात्, तथैव दोषयुक्तमपि काव्यं न काव्यत्वात् परिहीयते। दोषास्तु केवलं काव्यस्योपयोगितां खर्वीकुर्वन्ति, न तु ते काव्यं काव्यत्वात् प्रच्यावयन्ति। अतो मम्मटकृतकाव्यलक्षणे अदोषौ इति काव्यलक्षणघटकपदोपादनमसङ्गतमिति साहित्यदर्पणकर्तुराशयः।

---

[1] मम्मट., काव्यप्रकाश, 1, 2।
[2] करमरकर. र दा, मम्मटकृत. काव्यप्रकाशः, पृ. 204।
[3] काव्यादर्श. दण्डी।

**अदोषौ इत्यस्य मण्डनम्**

अदोषावित्यस्य काव्यत्वविघटका ये च्युतसंस्कारादयः प्रबला दोषास्तद्रहितौ शब्दार्थावित्यर्थोऽवगन्तव्यः। अतः एव ये दोषाः काव्ये रसास्वादं न व्यवदधति, त उपेक्ष्याः। परं ये श्रुतिकटुप्रभृतयो दोषा रसास्वादान्तरायभूतास्ते श्रृंगारादौ सर्वथा परित्याज्या इति लक्षणकर्तुर्मम्मटस्याशयोऽत्रानुसन्धेयः। अन्यथा निर्दोषस्य काव्यस्य सर्वथासम्भवत्वान्निर्विषयं काव्यलक्षणं भवेत्।

**सगुणौ इत्यस्य खण्डनम्**

सगुणौ इति काव्यप्रकाशकारकाव्यलक्षणघटकमपि पदं न साधु विश्वनाथमतेन। गुणानां रसधर्मत्वं कण्ठतो लक्षणकर्त्रा मम्मटभट्टेनैव प्रोक्तम्। तद्यथा-

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः।।[1]

परं काव्यलक्षणेनानेन गुणानां रसधर्मत्वमनायासेनैवापहस्तितं भवति। अतः सरसाविति वक्तव्ये सगुणाविति वचनं विभ्रमकरमेव। सर्वथा मम्मटभट्टेनापि काव्यस्य सरसत्वमिष्यत एव। तथा चोक्तं तेन-

**रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुणकवि कर्म[2] इत्यादि।**

**सगुणौ इत्यस्य मण्डनम्**

लक्षणवाक्ये शब्दार्थयोः सगुणत्वमुपचारत उपपन्नम्। यथा आकारोऽस्य शूरः इत्यादौ शौर्यस्यात्मधर्मस्याप्याकारे तद्व्यञ्जक आरोपो गुणवृत्या क्रियते, तथा गुणानां माधुर्यौजः प्रसादानां रसधर्मत्वेऽप्युपचारात्तद्व्यञ्जकेषु शब्दार्थेष्वारोपः कृतो भवति। इत्थं गुणाभिव्यञ्जकत्वाच्छब्दार्थयोः सगुणत्वोक्तिरप्रतिक्षेप्या।

---

[1] काव्यप्रकाश. मम्मट.।
[2] करमरकरः, र दा , मम्मटप्रणीतः काव्यप्रकाश., पृ 10।

अनया दिशाऽलङ्काराणामपि शब्दार्थविशेषताधायकत्वं समीचीनम्। यथा लौकिकानि कटककेयूरावतंसादीन्याभूषणानि रमणीनामवयवानलङ्कुर्वन्ति तद्द्वाराऽलङ्कार्यस्य शोभामपि पुष्णन्ति, तथैवानुप्रासोपमादयोऽलङ्काराः शब्दार्थावुपस्कुर्वन्तोऽङ्गिलमात्मानं रसमपि भूषयन्ति। अतः शब्दार्थयोः सालङ्कारयोरन्यतरोऽवश्यमुपादेयः। नीरसं स्फुटालङ्काररहितं काव्यं न शोभते। यतः काव्ये रसो वा स्फुटालंकारा वा चमत्कारहेतवः। रसालंकाराणामभावे किं निबन्धनं सहृदयाह्लादकत्वे चारुत्वे च काव्यस्य? स्फुटालंकाररसशून्यं तु काव्यं चित्रमात्रं सदधमकोटिमेवाटीकते।

वस्तुतस्तु मम्मटभट्टः काव्यलक्षणं भामहोक्तदिशोपनिबध्नन्नप्यव्यक्तरूपेण काव्ये रसस्य प्राधान्यं सर्वथा स्वीकरोत्येव। यथाहि-

**क्वापीत्यनेनैतदाह यत्सर्वत्र सालङ्कारौ क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः** [1] इति वृत्तिग्रन्थस्य संगति काव्ये रससद्भावाभ्युपगमेनैव सम्भवा। अन्यथा यत्र **यः कौमारहरः स एव हि वरः** इत्यादिषु पद्येषु न कश्चित्स्फुटोऽलङ्कारस्तत्र काव्यत्वमव्यापकं स्यात्। न च तथेष्टापत्तिः। पूर्वोक्त उदाहरणे विप्रलम्भशृङ्गारस्य चमत्कारः सर्वजनप्रतीतिसिद्धो नापह्नोतुं शक्यः। अतः प्राचीनपरिपाट्यनुरोधेन स्वकीये काव्यलक्षणवाक्ये शब्दार्थयोः सरसत्वमनभिधायापि मम्मटः प्रकारान्तरेण रसात्मकत्वं काव्यस्योररीकरोत्येव।

## गजेन्द्रगद्करकृतं मम्मटोपनिबद्धकाव्यलक्षणप्रत्याख्यानम्

मम्मटकृतकाव्यलक्षणं प्रति महत्यनास्था आधुनिकानां ए. बी. गजेन्द्रगद्करमहोदयानामपि।[2] तेषां मतेन रसप्राधान्यवादिनोऽपि मम्मटस्य काव्य लक्षणे सरसाविति पदाभावो हृदयोद्वेजकः। काव्यप्रकाशस्य चतुर्थ उल्लासेऽभिनवगुप्ताचार्यमतं समर्थयन् मम्मटः स्वयं स्पष्टमेव रसप्राधान्यमभ्युपगच्छन् स्वकीये काव्यलक्षणे

---

[1] काव्यप्रकाशः मम्मट।

[2] Vide- Gajendragadkar, A. B. Kavyaprakasa of Mammata, Notes, p. 179-181.

THE SMT. HANSA MEHTA LIBRARY • M.S. University of Baroda

रसमुपेक्षमाणस्तावन्न सह्यः। सरसाविति सुस्पष्टमनभिधाय सगुणाविति वचनं न युक्तिसङ्गतम्। लक्षणेन तु सर्वथा स्वरूपसंस्पर्शिना भाव्यम्। एतल्लक्षणद्वारा मम्मटेन काव्यस्वरूपं नोद्घाटितम्। दोषगुणालङ्कारादयोऽङ्गिनं कञ्चिदपेक्षन्ते। स एवात्र नोक्तः। अतः सरसावित्येव वक्तव्यं भवति, यदपेक्षया गुणालङ्कारादयः स्वात्मलाभं लभन्ते। अन्यथा किमपेक्षया कस्य गुणत्वमलङ्कारत्वञ्चोपपद्येत। अतो गजेन्द्रगद्करमहाभागानां मते वाक्यं रसात्मकं गेयं काव्यशब्दाभिसंज्ञितम् इति काव्यलक्षणं पर्यवसितं भवति।

वस्तुतस्त्वस्माकं मते मम्मटाऽऽचार्यः स्वकीये काव्य-लक्षणे प्राचीनानां भामहादीनामर्वाचीनानाम् आनन्दवर्धनादीनामाचार्याणाञ्च विसंवादि मतमुपस्थापयन् मत-द्वयस्य परस्परं समन्वयमातन्वन् अनवद्यं काव्य-लक्षणं बध्नाति। भट्टोद्भटादिभिरलङ्कार-तन्त्र-प्रजापतिभिः काव्ये वाच्य-वाचक-धर्माणां काव्यकामिन्या बाह्य-शोभोपकरण-भूतानामाभूषण-कल्पानामनुप्रासोपमादीनामलङ्काराणां काव्ये प्राधान्यं प्रपञ्चितम्। तथा चोक्तमाचार्येण रूय्यकेन-

तदेवम् अलङ्कारा एव काव्ये प्रधानम् इति प्राच्यानां मतम्।

अत एव भामहादयः शब्दार्थ-साहित्याऽऽत्मकं काव्य-स्वरूपमभिदधति। तेषां मते काव्ये शब्दस्य चारुत्वमनुप्रास-यमकादिभिः शब्दालङ्कारैरर्थस्य च चारुत्वमुपमोत्प्रेक्षादिभिरर्थालङ्कारैः सम्पद्यते। अतोऽनुप्रासोपमादिभिरुपस्कृतौ रमणीयौ शब्दाऽऽर्थौ काव्यम्। तेनैव काव्य-लक्षणे प्राचीनाऽऽचार्यैः शब्दाऽर्थौ काव्य-लक्षण-वाक्यस्य घटकत्वेनोपात्तौ। शब्दार्थोपस्कारकाणामनुप्रासोपमादीनाञ्च तेषां लक्षण-ग्रन्थेषु सविस्तरं प्रपञ्चः। लक्षण-ग्रन्थानामभिधानं सर्वथाऽन्वर्थकं काव्यालङ्कारसार-संग्रहादीतिरूपेण। इत्थं भामहोद्भटादि-पद्धतिमनुसरन् मम्मटः शब्दार्थौ काव्यम् इति वदंस्तयोः सालंकारत्वमपि स्वकीये काव्यलक्षण उपनिबध्नाति। अत एव सालङ्कारौ शब्दार्थौ मम्मटस्याऽभिमतौ। एवं मम्मटस्य काव्य-लक्षणे चिरन्तानामाचार्याणां प्रभावः सुस्पृष्ट एव। शब्दाऽर्थयोः साहचर्य काव्ये परम-रामणीयकमादधाति। अलङ्कृतौ च शब्दार्थौ काव्ये परमशोभाभ्राजिष्णू भवतः।

शब्दोऽर्थस्याऽर्थ: शब्दस्य च सहकारितां प्रत्यवेक्षते। अतो नैकोऽन्यं विनाऽवस्थातुमर्हति। अत एव भामहादिभिराचार्यै: सहितयो शब्दार्थयो: काव्यत्वमभिद्धादि्भ: साहित्य-प्रस्थानं समुज्जृम्भितम्।[1]

वयं त्वित्थं प्रतीम:। भामहादीनामालङ्कारिकाणां काव्य-लक्षणं न खलु सर्वथा निर्दुष्टम्। यतो न काव्ये सर्वदाऽनुप्रासोपमादयोऽलङ्कारा एव चारुत्वमादधति, अपितु काव्येषु स्फुटालङ्कार-रहितान्यपि सहृदयहृदयावर्जकानि पद्यानि दृश्यन्ते। तथाहि-

य: कौमार-हर: स व हि वरस्ता व चैत्रक्षपा
स्ते चीन्मोलितमालतीसुरभय: प्रौढा: कदम्बानिला:।
स चैवाऽस्मि तथाऽपि तत्र सुरतव्यापारलीला-विधौ
रेवारोधसि वेतसी-तरुतले चेत: समुत्कण्ठते।।[2]

अपि च-

एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी।
लीला-कमल-पत्राणि गणयामास पार्वती।।[3]

इत्यनयो: स्थलयोर्न कश्चित् काव्य-चारुत्वाऽऽधायक: स्फुटोलङ्कार: प्रतीयते। अतोऽलङ्कारैरुपस्कृतमेव काव्यं यदि जीविति, तदेदं पद्य-द्वयं काव्यपदवीत: प्रच्युतमेव स्यात्। परं नैतन्निर्मल-प्रतिभावतां काव्याऽऽनन्द-मकरन्दषट्पदानां साहित्यिकानामनुभवाऽनुकूलम्। एतादृशेष्वपि स्फुटालङ्कार-विरहि-तेषूदाहरण-वाक्येष्वनुभूयते एव सहृदयै: कोऽप्यपूर्व: काव्यानन्द:। अनुभवसिद्धश्चाऽर्थौ न बालेनाऽप्यपलपितुं शक्य:। अतोऽलङ्कार-विरहेऽपि रसानुगुणाऽर्थ-विशेषोपनिबन्धनात् काव्ये शोभातिशयो विभाव्यते। अत: सालङ्कारौ एव शब्दार्थौ इति काव्यत्वेनाऽभ्युपेयेते, तर्हि रस-सिक्तात्मनां कालिदासादीनां महाकवीनां काव्यं काव्य-कोटौ न गण्येत। न च, तथेष्टापत्ति:, कालिदासादीनां

---

[1] 'शब्दार्थौ सहितौ काव्यम्'- भामह:, काव्यालङ्कार., 1, 16।

[2] काव्यप्रकाश. मम्मट.।

[3] कुमारसम्भवम्।

सहृदय-हृदयावर्जक-काव्यानां काव्यत्वरूपेण सकलालङ्कारिकाऽनुभव-सिद्धात्वात्। अत एव प्राचीनाऽऽचार्य-मतसरणिमनुसरताऽपि मम्मटेन न सर्वथा सालङ्कारौ इति पदं काव्यलक्षणघटकत्वेनाऽनुप्रवेशितम् स्वकीये काव्य-लक्षणे, अपितु 'अनलङ्कृतो पुनः क्वापि' इति रसवादि-मताऽनुमतं सगुणौ इति पदं चाऽनुप्रवेशयता निरलङ्कारयोर्माधुर्यौज:-प्रसाद-गुण-विशिष्टयोः शब्दार्थयोरपि काव्यत्वं भणितम्। न हि काव्यत्वमलङ्कारेष्वेवाऽवशिष्टम्, प्रत्युत निरलङ्कारेभ्यः शब्दार्थेभ्योऽपि विविधश्रृङ्गारकरुणरौद्रवीराऽऽदिरसाऽऽवेशवशात् परमाह्लादः सहृदयहृदयाऽनुभवसिद्धः समुन्मिषति, तत्राऽपि काव्यत्वस्याऽनपलपनीयत्वात्। तथा चोक्तं प्रतिहारेन्दुराजेन-

**'लक्ष्ये चाऽलङ्काररहितम् केवलगुण-सत्क्रियमाणशब्दार्थशरीरं काव्यं दृश्यते।'**

यथा- अमरुकस्य कवेरनिबद्धश्रृंगाररसस्यन्दी श्लोकः-

कथमपि कृतप्रत्यापत्तौ प्रिये स्खलितोत्तरे
विरहकृशया कृत्वा व्याजप्रकल्पितमश्रुतम्।
असहनसखीश्रोतप्राप्तिप्रसादससंभ्रमं
विवलितदृशा शून्ये गेहे समुच्छ्वसितं ततः।।[1]

**'न खल्वत्राऽर्थालङ्कारः कश्चित् परिदृश्यते। अथ माधुर्यौजोभ्यां परिबृंहितस्य प्रसादस्य विद्यमानत्वात् काव्यरूपता इति'।**[2]

'एवं नव्यानां काव्येऽलङ्कार-प्राधान्यमत- विध्वंसिनां ध्वनेश्च काव्यात्मत्वसमर्थकानामानन्दवर्धनादीनामाचार्याणां ध्वनि-पक्षोऽपि मम्मटेन काव्य-लक्षणेऽनुप्रवेशितः। गुणानां रस-धर्मत्वाद् गुणाऽभिव्यञ्जक-सामर्थ्येन शब्दार्थयोश्चापि सगुणत्व-धर्मस्योपपन्नत्वात्, निरलङ्कारस्याऽपि काव्यस्य रस-व्यञ्जकतया सगुणतया शक्योपपादत्वात्, मम्मटाचार्येणाऽऽनन्दवर्धनाचार्यस्य

---

[1] अमरुकशतकम्।

[2] बनहट्टी, नारायणदास., उद्भट्टकृतः काव्यालङ्कारसारसंग्रहः, इन्दुराजकृता लघुवृत्तिटीका, पृ 82।

ध्वनि-सिद्धान्तोऽपि स्वकीये काव्य-लक्षणे समावेशितः। न हि सर्वथा सालङ्कारयोरेव शब्दार्थयोः काव्यत्वमिष्टं मम्मटस्याऽपित्वलङ्कार-विरहितयोः सगुणयोरपि शब्दार्थयोः काव्यत्वमव्याहतम्। अत एव 'यः कौमार-हर' इत्यत्र पूर्वोदाहृते पद्ये स्फुटाऽलङ्कार-विरहेऽपि विप्रलम्भश्रृंगाररसस्याऽभिव्यक्तेरुत्तमोत्तमं काव्यं सिद्धम्। तथा चोक्तं प्रदीपकारेण- 'अनलङ्कृती पुनः क्वापि' इति काव्य-लक्षण-घटकं वाक्यांशं विवृण्वता-

**'यतो रसादिरलङ्कारश्च द्वयं चमत्कारहेतुः। तथा च यत्र रसादीनाम् अवस्थानं न स्फुटालङ्कारापेक्षा'[1] इत्यादि।**

यच्च विश्वनाथाऽऽचार्येण विभावना-विशेषोक्ति-दर्शनात् सालङ्कारत्वमस्य पद्यस्य प्रदर्शितम्[2], तत् तयोरस्फुटत्वात् सहृदय-हृदयाऽनास्वाद्यत्वाच्च व्यवाकृतम् भवति। अपि च सम्भवन्नपि यद्यलङ्कारः सहृदय-हृदयं नाऽऽवर्जयति, तर्हि तस्याऽसत्कल्पत्वमेव। अस्वाद्योऽत्र विप्रलम्भ-श्रृंगारः। अत एव तस्यैव प्राधान्यम् नहि। विभावना-विशेषोक्तिकृतैव सहृदयचमत्कृतिरत्र। आस्वाद्यस्तवसावलौकिको रसो यस्य चारुत्वसाम्राज्यं नालङ्कार-मुखप्रेक्षम। रसे सति ह्ययलङ्कारा अहमहमिकया आपतन्ति तमुपस्कर्तुं कटककुण्डलादिलौकिकाऽलङ्कारवत्। अन्यथा निर्जीवो देहो यथा नाऽलङ्कारैः कामपि शोभां प्रकटयति, प्रत्युत वैरस्यमेवाऽऽविर्भावयति तथाऽलङकारा अप्यनुप्रासोपमादयोऽङिगनो रसस्याऽभावो निर्जीवदेहोपरि-धृत-कटक-कुण्डलाऽऽदिलौकिकाऽलङ्कारवत् परम-वैरस्यमेव विदग्धानां मनस्स्वातन्वन्ति, दूरे चर्चा चारुतायाः। अतोऽलङ्कारा एव काव्ये परमशोभाधायका नाऽऽकलनीयाः, तदभावेऽपि रस-कृतं गुण-कृतं, वा काव्यचारुत्वमक्षुण्णम्। इत्थं मम्मटेन 'शब्दार्थयोः' साललङ्कारत्वम् अप्युररीकुर्वता न खलु सर्वथाऽलङ्काराणामेव काव्ये प्राधान्यं सूचितम्, प्रत्युत यं रसं विनाऽलङ्कारा अलङ्कारतामेव नाऽऽप्नुवन्ति, असौ ध्वन्यमानो रसोऽपि गुणानां भङ्ग्या काव्य-शोभाधायकः प्रोक्तः।

---

[1] म महोपाध्याय., पण्डित. दुर्गाप्रसाद., गोविन्दकृतः काव्यप्रदीपः पृ 27।
[2] शास्त्री, शालग्राम , श्रीविश्वनाथकविराजकृत. साहित्यदर्पणः, पृ. 17।

अपरत आनन्दवर्धनाऽऽचार्यस्य ध्वनि-सिद्धान्तेऽलङ्काराणां स्थानमवरम्। भामहोद्भटादीनां शब्दार्थ-साहित्य-प्रस्थानेऽलङ्काराणामेव प्राधान्यम्। परं काव्ये चारुत्वं न सर्वथाऽलङ्कार-कृतम्। निरलङ्कारस्याऽपि काव्यस्य ध्वनिमुखेन चारुत्वाऽऽधायकत्वात्, नाऽपि चारुत्वं सर्वथा ध्वनिपृष्ठाऽवलम्बि, निर्ध्वनेरपि काव्यस्याऽनुप्रासोपमाद्यलङ्कार- कृत-चारुत्वेन ग्राह्यत्वात्। दृश्यन्ते हि सचेतसोऽनुप्रासोपमादि-कृतं काव्य-चारुत्वमास्वादयन्तः। यदि केवलं रसकृतमेव चारुत्वं स्यात्, तर्हि नदी-पर्वताऽऽदीनां वर्णनं महाकवि-कृतं यत् समुपलभ्यते, तत्राऽकाव्यत्वमेव स्यात्। तथा चोक्तं पण्डितराज-जगन्नाथेन-

**'यत्तु रसवद् एव काव्यम् इति साहित्यदर्पणे निर्णीतम्, तत्र वस्त्वलङ्कारप्रधानानां काव्यानामकाव्यत्वापत्तेः। न चेष्टापत्तिः। महाकविसम्प्रदायस्याऽऽकुलीभावप्रसङ्गात्। तथा च जल-प्रवाह-वेगनिपतनोत्पतन-भ्रमणानि कविभिर्वर्णितानि, कपि-बालादि-विलसितानि च।'**[1]

इत्थं मम्मटाचार्येणाऽपूर्वया धिषणया प्राचामलङ्कारिकाणाम् अलङ्कारंप्रस्थानम् अर्वाचामानन्दवर्धनादीनाम् आचार्याणां च ध्वनि-प्रस्थानं स्वकीये काव्यलक्षणे समन्वितम्। एवं दोष-गुणाऽलङ्कार-ध्वनि-विवेचन-परं मम्मटस्य काव्यलक्षणं विद्वन्-मनोग्राहितामवलम्बते। तस्तुतस्तु तस्य तद्दोषौ शब्दार्थौ इत्यादि काव्य-लक्षणं प्राचीनार्वाचीनालङ्कार-शास्त्र-पयोनिधिर्मन्थनोद्भूत-महार्घ-महारत्न-कल्पमस्ति। अत्र प्राच्य-नव्याऽऽचार्याणां मत-विसंवाद-समन्वयः स्पष्टं लक्ष्यते। भामहादिभिः शब्दार्थयोः सहितयोः काव्यत्वं समाख्यातम्। दण्डिना **'दृष्टार्थव्यवच्छिन्ना पदावलिः'** [2] इत्यभिदधता शब्दस्य प्राधान्यं काव्ये स्वीकृतम्। ध्वनिकारेण ललनालावण्य-प्रख्यस्य प्रतीयमानार्थस्यैव काव्ये सर्वातिशायित्वमुद्घोषितम्, अलङ्काराणाञ्च वाच्य-वाचक-धर्माणां सर्वथा न्यग्भावः प्रदर्शितः।[3] परं मम्मटस्य काव्य-लक्षणं सकलाऽलाङ्कारिकोद्भावितं स वं तत्त्वं क्रोडीकुर्वत् परिपूर्णम्।

---

[1] रसगङ्गाधर.।

[2] दण्डी, काव्यादर्शः, I, 10।

[3] शास्त्री, पण्डितः पट्टाभिरामः, आनन्दवर्धनाचार्यकृत. ध्वन्यालोक, पृ 415।

# काव्यभेदः

प्राचीनकाले भूमंण्डलेस्मिन् अनेकेराजानः आसन्। प्रत्येक राजसभायाम् कवयः आसन। राजसभायाम् कवि संमेलनस्य आयोजनम् सामाजिकानाम् मनोरंजनाय अयोज्यते। तत्र कवयः बहुधनं सम्मानम् यंशमाप्नुवन्ति कविः प्रतिभानैपुण्येन काव्यम् विरच्य सभायाम् नूतनानिनूतन प्रयोगेण चमत्कृतिमानयति तत्र रचना काव्यस्य निमित कारणम् भवति। काव्यस्य स्वरुपम् एव काव्यस्य उपादान कारणम्। कारणम् विना काव्यम् समुत्पन्नम् न भवति। अतः साहित्ये कारणस्य कारणम् काव्यस्य स्वरुपम् उभयोः परस्परम् निमितोपादानात्कारणत्वेन भवति।

समाजस्य कल्याणाय कविः यत् किम्पि दृश्य - श्रव्यरुपेण काव्यम् रचयति। तत्र तस्य प्रतिभाएव कारणम् भवति। काव्यस्य भेदद्वव्यम् भवति। दश्यकाव्यम् श्रव्यकाव्यम् च आचार्ये भामहेन काव्यस्य वर्गीकरणम् वैज्ञानिक रीत्या चर्तुविध रुपेण कृतम्। तत्र छंदस्याभावेन गधकाव्यम् छंदोयुक्तम् पधकाव्यम् च भाषाधिकृत्य काव्यस्य भेदत्रयम् तेन प्रदर्शिनम्। काव्यम् संस्कृत प्राकृतकाव्यम् अपभ्रंसकाव्यम् च विषयमधिकृत्य ख्यातवितम् कवि कल्पितम् कलाश्रितम्, शास्त्राश्रितम् च स्वरुपविधानमधिकृत्य महाकाव्यम्, रुपकम् आरव्यायिका, कथा, मुक्तकमञ्चेति। संस्कृत साहित्यस्य समालोचकैः गध-पधयोः मैलिकम् भेदम् नैवप्रदतम्। तन्मते गधमपिकाव्यम् पधमपिकाव्यम् पधअपेक्षायां गधस्य स्चनो बहु कठिनम् उक्तम् च वामनाचार्येण " गधम् कवीनाम् निकषम् वदन्ति "। काव्य विभाजनस्य द्वितीयो आधाराः तेषां मते भाषाअस्ति। अतः तीन संस्कृत, प्रोकृत अपभ्रंस काव्यस्य चर्चा कृतम् वर्तते। महाकविना दण्डिनग मिश्र[1] नामकस्य चतुर्थभेदस्य चर्चाकृतम् चर्तते। भाषाणाम् केवलम् नामप्रदतम् परंतु महाकाविना दण्डिना तस्य स्वरुपस्य निर्धारणम् अपि कृतम् वर्तते।[2] भामहेन विषयम्धिकृत्य काव्यस्य यत् चत्वारो भेदाः प्रतिदर्शिताः तत्र अंतिम् दव्यस्य आलंकारिकैः नैव सविकृतम् तेषां मते कलाम् शास्त्रं च प्रतिपादय विषयम्

---

1. तदेतद वड्मयं भूयः संस्कृतं प्राकृतं तथा। अपभ्रंशेश्च मिश्रं चेत्याहुरार्यश्चतुर्विधम्॥ का. द. 1/32.
2. का.द.1.। 33- 36।

अगीकृत्य काव्यरचना नैवकर्तुम् शक्यते।

भामहाचार्येण महाकाव्यस्य महत्वम् प्रदर्शितम्। तत्र सर्ग बध्धता उन्तम् कुलोतपन्नस्य नायकस्य चरित्रोतधातनम् ग्राम्यशब्दार्थ रहितम् अर्थसौष्ठवयुक्तम् अलंकार युक्तम् मंत्रणा दूतप्रेषण अभिमान युध्ध तथा नायकस्य अभ्युदयप्रसंगान महाकाव्ये वर्णनम् आवश्यकम् महाकाव्यो अयम् संधि - संधान युक्तम् अनतिव्यारव्यायेम् चर्तुविध पुरुषर्थयुक्तम् लौकिक व्यवहार युक्तम् रसानाम्गाहनाप्रयोग समन्वितम् भवति। भामहेन, अंतिमे अभिनेयार्थ इत्यत्र नायक, द्विपदी, सम्या, रासक, स्कंधक, इत्येतानि पंचनामानि परिगणितानि अधपि धनञ्जयतथा विश्वनाथेन एतदृशम् रुपक भेदानाम् चर्चा नैवकृतम्।

# काव्यं शास्त्रं च

साहित्याचार्यैः काव्यशास्त्रोपस्कृतम् रस, ध्वनिः अलंकाराः, वक्रोक्तिः, रितिः, औचित्यम्, शब्दशक्तिः, आवश्यकम् मन्यन्ते। इदमेव शास्त्रं काव्यस्य मापतत्वम् काव्यशास्त्रीय निकषरुपेण प्रचलितमिदम् शास्त्रं मूलभूततत्वम् विवेचनम् विश्लेषणम् च करोति। शास्त्र शब्दस्य व्युत्पपत्तिमूलोकाअर्थाः अस्ति शासनम्। अमरकोशमते निर्देशग्रंथाः एव शास्त्रं आचार्य दण्डिमते यो शास्त्रं न जानाति सगुणदोषानाम् सम्यक विभाजितुम शक्नोति। अर्थात गुणदोषानाम् सम्यक विभाजितुम काव्यशस्त्रीयम् ज्ञानम् अवश्यकम् वर्तते। यथाभाषाशास्त्रे लिंग, वचन, क्रियाविशेषण, अव्यय, कारक वर्ण पदादीनाम् विवेचनम् विश्लेषणम् क्रियते तथैव काव्य शास्त्रस्य ज्ञाता काव्यस्य अन्तः प्रविष्य तत्वानाम् अनवेषणम् करोति। भाषा शास्त्रे भाषायाः व्याकरण दृष्ट्या अध्ययनम् क्रियते। तथैव काव्यशास्त्रे अपि समालोचकाः सम्यकफलम् प्राप्य काव्यस्य बौध्दकम् विवेचनम् करोति तथा अंतः लोकरजंकं शक्तेः उदधाटनमकरोति। काव्यशास्त्र द्वारा काव्यसत्यानाम् अनवेषणम् क्रियते। डॉ. भगीरथमिश्र मतानुसारेण काव्यस्य स्वरुपम् तथा समस्यायाः विचारम् क्रियते यमविषयम् अवलम्ब्य विचारम् क्रियते तन्नाम् काव्यशास्त्रम् । काव्यशास्त्रमिदम् काव्यसम्बन्धिनी जिज्ञाषायाः समाधान शास्त्रं अस्ति। यस्मिनशास्त्रे काव्यतत्वेम् रहस्यम् मर्माणि मूलरुपेण तथा अवान्तररुपेण ज्ञायते तन्नामो काव्यशास्त्रं । इदमेव काव्यशास्त्रं काव्यसत्यस्य अत्वेषणम्

करोति। काव्यस्वरुपम् अनुसंधाति तथा तस्य आगमतत्वस्य स्थापना करोति। तस्माद् कारणातएव अनेकेसाम् संप्रदायानाम् जन्म अभवत केनापि कविना सत्यमीक्तम्।

" काव्य हन्यते शास्त्रं काव्यं गीतेन हन्यते।
गीतं नारि विलासेन श्रुधया सोऽपि हन्यते॥ "

शास्त्रं काव्यात् पराजयमाप्नोति गीतेन काव्यम् पराजयमप्राप्नोति गीतं नारि विलासम् पराजयम्प्राप्नोति पुन: नारिविलासम क्षुधया पराजयम् प्राप्नोति । कवि: स्वविषयम् प्रतिपादवितुम् सामान्यअपेक्षया वक्रताया: व्यंजनाया: अथवा सामान्यअपेक्षया अन्यार्थस्य प्रतीतिम् कारयति आचार्य कुन्तकमते सामान्य भाषाअपेक्षया काव्य भाषायाम् सामान्यअपेक्षया अधिकम्वक्रता द्रष्टुम्शक्यते भोज मते शास्त्रीयाभाषा तथा लोकभाषा अवक्रमभवति। परंतु काव्यभाषा वक्रभवति ।काव्यभाषाया: अलंकरणम्नाम अलंकारा:। आचार्ये वामनेन सौंदर्यम् अलंकारा: उक्तम् तन्मते अलंकारा: काव्य शोभाया: आधायकम्तत्वम्। आचार्य भामहा मते मितान्त शब्दार्थ प्रयोगेण भाषायाम् चमत्कृति: नैवआयाति। अभिधा अपेक्षया वक्रप्रयोगेण काव्ये चमत्कारसृष्टि जायते। भोजेन वक्रताम् एव अलंकाररुपेण स्वीकृतम् तन्मते अवक्रशब्दार्थौ वार्तामात्रमेव आचाय अप्पयादिक्षितमत् उपमाएव सर्वेषाम् अलंकारणम् जननी। अनेन सिध्धम् भवति यत वैचित्यम् एव अलंकारा:। शब्दार्थौ जायमानम् वैचित्यम एव काव्यम्। वाच्यार्थ अपेक्षाया यत्र व्यंग्यार्थस्य प्रतिति भवति तन्नाम् ध्वनि: । इदमीव काव्यम् बुधै: वैयाकरणै: प्रधानभूत स्फोटरुप व्यंग्य व्यंजकस्य शब्दस्य ध्वनिरिति व्यवहाराकृत: । अनेन स्पष्टम् भवति इमे ध्वनि वक्रोन्ति अलंकरणम् रीति आदि सिध्धांता: शब्दार्थयो: परस्पर मधुर सम्बंधस्य सरोवरे जायमानस्य पुष्पस्य अनेकेसाखा: सन्ति।